Gyanshauryam, International Scientific Refereed Research Journal
© 2020 GISRRJ | Volume 3 | Issue 4 | ISSN : 2582-0095

# भट्टिकाव्ये द्वितीये सर्गे लुङ्-लकारस्य प्रयोगः



श्रावणी मान्ना
आचार्यछात्रीः- व्याकरणम्,
राष्टियसंस्कृतसस्थानम् ,
नवदेहली

**शोधालेखसारः** – भट्टेः काव्यम् (षष्टीतत्पुरुषः) वा भट्टिकृतं काव्यम् भट्टिकाव्यम्। महाकविभट्टिकृतं भट्टिकाव्यम् रावणवधाभिधेयं महाकाव्यं संस्कृतसाहित्ये महाकाव्यत्वेन समादृतम्। रामकथामाश्रित्य रचितमिदं काव्यं यद्यपि वैयाकरणकविना व्याकरणशिक्षादानार्थमेव प्रणीतम् तथापि अलंकारपारिपाट्येन छन्दोमाधूर्येण च इदं काव्यं रससमृद्धं सञ्जातम्। द्वितीये सर्गे शरद्वर्णने कवेर्नेपूर्णं विशेषेण प्रतिफलितम्।वेदपुरुषस्य मुखं भवति व्याकरणम्। “व्याक्रियन्ते शव्दाः अनेन इति व्याकरणम् ”इति व्युत्पत्त्यनुसारेण संस्कृतवाङ्मये प्रयुक्तानां शब्दानां शुद्ध्यशुद्ध्योः विचारः व्याकरणेनैव क्रियते।महर्षे यास्कस्य निरुक्तग्रन्थे तु व्याकरणस्य अनेकेषां पारिभाषिकशव्दानां प्रयोगः समुपलभ्यते। व्याकरणस्य लब्धप्रतिष्टाचार्यः पाणिनिः स्वकीयेऽष्टाध्यायीनामके ग्रन्थे स्वपूर्ववर्तीनां अनेकेषां वैयाकरणानां नाम निर्दोशं चकार। पाणिनिशव्दानुशासनग्रन्थद्वारा लौकिकसंस्कृतभाषां व्यवस्थापयामास। इत्थं शव्दानुशासनम् अष्टाध्यायी वा व्याकरणवेदांगस्य प्रतिनिधिग्रन्थः अस्ति।प्रत्येकस्मिन् वाक्ये या काऽपि क्रिया भवत्येव । कर्तुः कर्मणः सम्बन्धं , कर्तुः कार्यं च सूचयति क्रिया । बालकः विद्यालयंगच्छति , छात्रः पाठं पठति , कविः कवितां लिखति इत्यादिषु वाक्येषु गच्छति , पठति ,लिखति इत्यादीनि क्रियापदानि । क्रियापदानि द्विविधानि – तिङन्तानि , कृदन्तानि च ।पाणिन्युक्ताः दश लकाराः इत्थं भवन्ति। वर्तमान-भूत-भविष्यरूपेण त्रयः कालाः भवन्ति। यथोक्तम् –

**लट् वर्तमाने लेट् वेदे भूते लुङ् लिटस्तथा।**
**विध्याशिषोस्तु लिङ्लोटौ लुट् लृट् लृङ् च भविष्यतः॥**

लेट लकारस्य प्रयोगः वैदिकप्रक्रियासु क्रियते। धातुषु दश गणाः भवन्ति। यथा –

**भाद्यदादी जुहोत्यादिदिवादिः स्वादिरेव च।**
**तुदादिश्च रुदादिश्च तनक्र्यादिचुरादयः॥**

भट्टिकाव्ये द्वितीय सर्गे लुङ् लकार शव्दानां रूपंसिद्धिं अहं करोमि।

**मुख्यशब्दः** – महाकविभट्टि, भट्टिकाव्यम्, द्वितीय सर्ग, लुङ्-लकार, व्याकरणम्।

**पाणिनीयव्यकरणम्** – वेदपुरुषस्य मुखं भवति व्याकरणम् ।“व्याक्रियन्ते शव्दाः अनेन इति व्याकरणम् ”इति व्युत्पत्त्यनुसारेण संस्कृतवाङ्मये प्रयुक्तानां शब्दानां शुद्ध्यशुद्ध्योः विचारः व्याकरणेनैव क्रियते।महर्षे यास्कस्य निरुक्तग्रन्थे तु व्याकरणस्य अनेकेषां पारिभाषिकशव्दानां प्रयोगः समुपलभ्यते। व्याकरणस्य लब्धप्रतिष्टाचार्यः पाणिनिः स्वकीयेऽष्टाध्यायीनामके ग्रन्थे स्वपूर्ववर्तीनां अनेकेषां वैयाकरणानां नाम निर्दोशं चकार। पाणिनिशव्दानुशासनग्रन्थद्वारा लौकिकसंस्कृतभाषां व्यवस्थापयामास। इत्थं शव्दानुशासनम् अष्टाध्यायी वा व्याकरणवेदांगस्य प्रतिनिधिग्रन्थः अस्ति। अस्य पाणिनिव्याकरणस्य सम्प्रदायद्वयस्य उपलभ्यते, प्राचीनव्याकरणं नव्यव्यकरणंञ्च।किमिति चेत् – मुखं विना भोजन –व्यापारः नास्ति। भोजनं विना शरीरं नास्ति। शरीरं विना प्राणरक्षणं न भवति। ऋग्वेदे व्याकरणस्य प्रशंसा एवमस्ति –

**चत्वारि शृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्तहस्तासो अस्य।**
**त्रिधा बद्धो वृषभो रोरवीति महादेवो मर्त्या आविवेश।।**

व्याकरणस्य इच्छापूर्तिकारणत्वाद् वृषभेदि नाम्ना सम्वोधमस्ति।अस्य चत्वारि शृङ्गाणि भवन्ति। तानि (1) नाम ,(2) आख्यातः(क्रिया) (3) उपसर्गः (4) निपातः। त्रयः पादाः –वर्तमान-भूत-भविष्यत्कालाः एते त्रयः कालाः विद्यन्ते। द्वे शीर्षे –सुप् ,तिङ्।अस्य सप्त हस्ताः – प्रथमादयःसप्तविभक्तयः सन्ति। त्रिधा बद्धः-व्याकरणस्य वृषभः उरः, कण्ठः, शिरः, इति स्थानेषु बद्ध इति।अयं महान् देवो ,यः मनुष्येषु प्रविष्टो विद्यते। भगवान पतञ्जलिः व्याकरणस्य प्रयोजनानि प्रत्यपादयत्। तेषु (1) रक्षा ,(2) ऊहः,(3) आगमः,(4) लघुः,(5) असंदेहः,(6) अपभाषणम्,(7) दुष्टःशव्दः, (8) अविद्वांसः, (9) विभक्तिंकुर्वन्ति, (10) यदधीतम् , (11) यस्तु प्रयुक्ते , (12) यो वा इमाम् , (13) चत्वारि इत्यादि महाभाष्योदाहरणानि अपि व्याकरणमध्ययनानां प्रयोजनानि सन्ति।

**“छन्दः पादौ तु वेदस्य , हस्तौ कल्पोऽथ पठ्यते ,**

**ज्योतिषामयनं चक्षुर्निरूक्तं श्रोत्रमुच्यते।**

**शिक्षा घ्राणन्तु वेदस्य ,मुखं व्यकरणं स्मृतम्” ।।**

**तस्मात्सांगमधीत्यैव व्रह्मलोके महीयते ।**

इति पाणिनीयशिक्षाकारस्य वचनेन सिद्ध्यति यत् "मुखं व्याकरणं स्मृतम् " अत्र तु सूचयति यत् व्याकरणम् अन्य वेदांगैः अतुलनीयम् अस्ति ।किंच श्वासप्रश्वासस्य गतिशीलने सति समस्त लोकजीवनधारणे समर्था भवन्ति ।व्याकरणशास्त्राणां विधिवत् ज्ञानं , वेदांग स्वरूपस्य रक्षा करोति एवं च स्वर्गे लोके च कामधुक् भवति इति वचनमपिचरितार्थं भवति । समुचितज्ञानाभावे तु –

**मन्त्रहीनः स्वरतो वर्णतो मिथ्याप्रयुक्तो न तमर्थमाह ,**

**स वाग्वज्रो यजमानं हिनस्ति , यथेन्द्रशत्रुः स्वरतोपराघात् ।**

यदा वैदिकसंस्कृतस्य समाप्तिः लौकिकसंस्कृतस्य च प्रादुर्भावोऽभवत्, तदा संस्कृतभाषायाः क्षेत्रे महती अव्यवस्था प्रसरति स्म । ततः विद्वान्सः एकस्य नूतनस्य व्याकरणस्य आवश्यकताम् अनुभवन्ति स्म । पाणिनिः अष्टाध्यायीनामकं ग्रन्थं रचयित्वा व्याकरणाभावं पूरितवान् ।अयं ग्रन्थः न केवलं व्याकरणनियमानां संकल्पमात्रोऽपितु भाषाविज्ञानोपरि व्याकरणोपरि च सर्वोकृष्टा मौलिका रचना अस्ति । अस्य ग्रन्थस्य रचना सूत्रप्रणाल्या अभूत् । पाणिनिना एकमपि पदं व्यर्थं न प्रयुक्तम् । अधुनापि विद्वज्जनाः सूत्रप्रणालीं समादरन्ति । उक्तञ्च –

**"अर्धमात्रालाघवेन पुत्रोत्सवं मन्यन्ते वैयाकरणाः"**

त्रिमुनिव्याकरणम् – पाणिनिमहर्षेः अष्टाध्यायी, कात्यायनस्य वार्तिकं, पतञ्जलिमुनेः भाष्यं च त्रिमुनिव्याकरणमिति प्रसिद्धंम्। अतएव-

मुनित्रयं नमस्कृतं तदुक्तीःपरिभाव्य च ।
वैयाकरणसिद्धान्तकौमुदीयं विरच्यते ।।

इति भट्टोजीदीक्षितेन वैयाकरणसिद्धान्तकौमुदीप्रारम्भे मङ्गलाचरणं विहितम् ।

**धातुपाठः** – महर्षिपाणिनिना स्वकीये शव्दानुशासने 'भूवदयो धातवः' १/३/१सूत्रमिदं पठितम्। अनेन सिद्धयति यत् खिलरूपधातुपाठस्याऽपि प्रवचनमेतसैव।अन्यत्रापि सूत्रेषु धातुसम्वन्धीनि कार्यानि पुष्कलतया पाणिनिना निर्दिष्टानि। यथा – लः परस्मैपदम् (१/४/९९) तङानावात्मनेपदम् (१/४/१००) स्वरितञितः कर्त्तभिप्राये क्रियाफले (१/३/७२) अस्तेर्भूः (२/४/५१) भूसुवोस्तिङि (७/३/८८) उपसर्गप्रादुर्भ्यमिस्तिर्यच्परः (८/३/८७)। उदाहरणार्थ प्रस्तुतेर्धात्वनुपूर्विभिः सूत्रैः सुतरां सिद्धयति यत् पाणिनिरेव धातुपाठस्यापि प्रवर्तकः।

**धातुप्रकरणम्** – प्रत्येकस्मिन् वाक्ये या काऽपि क्रिया भवत्येव । कर्तुः कर्मणः सम्बन्धं, कर्तुः कार्यं च सूचयति क्रिया। बालकः विद्यालयंगच्छति, छात्रः पाठं पठति, कविः कवितां लिखति इत्यादिषु वाक्येषु गच्छति, पठति,लिखति इत्यादीनि क्रियापदानि । क्रियापदानि द्विविधानि – तिङन्तानि, कृदन्तानि च । गच्छति, पठति, लिखति इत्यादीनि तिङन्तक्रियापदानि। आदिष्टवान्, खादितवान्, पीतम् इत्यादीनि कृदन्तक्रियापदानि। कृदन्तानां विषये अनन्तरं

विचारः करिष्यते। प्रकृतमत्र तिङन्तानां क्रियापदानां विषये विचारः प्रस्तूयते । तिङ् अन्ते येषां तानि तिङन्तानि। गच्छति, अपठत्, लेखिष्यति इत्यादीनि क्रियापदानि। गम्, पठ्, लिख्, इत्यादयः धातवः। तन्नाम क्रियापदानां मूलं धातुरेव। शुद्धधातुभिः सह तिङप्रत्ययानां योगेन प्रयोगार्हाणि क्रियापदानि उत्पद्यन्ते। पाणिनिमतानुसारं 18 तिङ् प्रत्ययाः भवन्ति। अग्रे तेषां प्रत्ययानां विस्तृतविवरणं प्रस्तोष्यते ।

धातवः त्रिविधाः भवन्ति – आत्मनेपदिनः, परस्मैपदिनः, उभयपदिनः च। उभयपदिनः नाम आत्मनेपदिनः परस्मैपदिनश्च। क्रमेण पुरुषाः त्रयः। पुनश्च तत्र एकवचनं, द्विवचनं, बहुवचनं प्रथमपुरुषः, मध्यमपुरुषः, उत्तमपुरुषः इति चेति त्रीणि वचनानि। पुरुषक्रमेणच तिङप्रत्ययाः पट्टिकारूपेण प्रस्तुयन्ते।पाणिन्युक्ताः दश लकाराः इत्थं भवन्ति। वर्तमान-भूत-भविष्यरूपेण त्रयः कालाः भवन्ति। यथोक्तम् –

**लट् वर्तमाने लेट् वेदे भूते लुङ् लिटस्तथा।**
**विध्याशिषोस्तु लिङ्लोटौ लुट् लृट् लृङ् च भविष्यतः॥**

लेट लकारस्य प्रयोगः वैदिकप्रक्रियासु क्रियते। धातुषु दश गणाः भवन्ति। यथा –

भाद्यदादी जुहोत्यादिदिवादिः स्वादिरेव च।
तुदादिश्च रुदादिश्च तनक्र्यादिचुरादयः॥

1. भ्वादिगण , (2) अदादिगणः, (3) जुहोत्यादिगणः , (4) दिवादिगणः , (5) स्वादिगणः।

(6) तुदादिगणः,(7) रुधादिगणः,(8) तनादिगणः ,(9) क्र्यादिगणः ,(10) चुरादिगणः।

प्रत्येकं गणस्य एकैकः विकरणप्रत्ययो भवति। एते विकरणप्रत्ययाः तदीयगणस्य वैशिष्ट्यं द्योतयन्ति। अष्टाध्यायाः अनुसारं संस्कृते १९४४धातवः सन्ति, ये एषु दशसु गणेषु विभक्ताः सन्ति ।

**भट्टिकाव्यपरिचयम्** –

भट्टेः काव्यम् (षष्टीतत्पुरुषः) वा भट्टिकृतं काव्यम् भट्टिकाव्यम्। महाकविभट्टिकृतं भट्टिकाव्यम् रावणवधाभिधेयं महाकाव्यं संस्कृतसाहित्ये महाकाव्यत्वेन समादृतम्। रामकथामाश्रित्य रचितमिदं काव्यं यद्यपि वैयाकरणकविना व्याकरणशिक्षादानार्थमेव प्रणीतम् तथापि अलंकारपारिपाट्येन छन्दोमाधूर्येण च इदं काव्यं रससमृद्धं सञ्जातम्। द्वितीये सर्गे शरद्वर्णने कवेर्नैपूर्णं विशेषेण प्रतिफलितम्। तदा शरत्प्रकृतिः नयनाभिरामशोभामण्डिता सती जीवलोकचित्तम् अपाहरत्। वृक्षतडागाकाशनक्षत्रादिषु कुत्रापि नास्ति मालिन्यलेशः। वनस्पतिषु विराजते अनिर्वचनीयः श्यामलिमा। निर्मेघे नभसि समुज्ज्वलं भान्ति ग्रहणक्षत्राणि , दिशश्च निर्मलाः जाताः, सर्वत्र जलाशयेषु स्वच्छानि जलानि कुमुदकमलैः शोभितानि। तत्र क्वचित् प्रभातवायुनां जलेषु तरङ्गाः जाताः । तत्र प्रस्फुटितानि कोकनदानि तरङ्गाघातेनान्दोलितानि आसन्। शरदागमे यथा जलानि पदमैः शोभितानि तथा वनानि अपि विविध-

पुष्पविकासैः मण्डितानि आसन् ।सर्वत्र जलस्थलयोरासीत् सौन्दर्यप्रतियोगिता । द्वाविंशतिसर्गात्मकं काव्यमिदं व्याकरणं दिशं चत्वारः भागे विभक्त आसन् –

(1) प्रकीर्ण काण्ड (प्रथमात् – पञ्चमः सर्ग पर्यन्तम्)

(2) अधिकार काण्ड ( षष्टात् – नवमसर्ग पर्यन्तम् )

(3) प्रसन्न काण्ड ( दशमात् – त्रयोदश सर्ग पर्यन्तम् )

(4) तिङन्त काण्ड ( चतुर्दशात् – द्वाविंशति सर्ग )

प्रकीर्ण काण्डे पाणिनिव्यकरणस्य भिन्न विषयकसूत्रस्य उदाहरणं प्रदत्तम् । यथा द्वितीय सर्गे "लतानुपातंकुसामान्यगृह्णात् स नद्यवस्कन्दमुपास्पृशच्च" इत्यादि श्लोके " विशिपति- पदिस्कन्दां व्याप्यमानासेव्यमानयोः" सूत्रानुसारेण णमुल प्रत्ययस्य प्रयोगः दृश्यते ।एवमेव भिन्न श्लोके विष्टर , विप्रदर्शनम् , अस्त्रचञ्चु ,मायाचणम् ,नदीष्ण इत्यादि पदानां प्रयोगेन पाणिनिव्याकरणस्य विशेषः विशेषः सूत्राणां प्रयोगः दृश्यते । द्वितीयसर्गे 'अदृक्षताम्भसि' ....श्लोके कर्मवाच्ये लुङ-स्य प्रयोगःवर्तते ।

अधिकारकाण्डे पाणिनिव्याकरण्य भिन्न सूत्राणां , अधिकारसूत्राणां उदाहरणं दृश्यते । उक्तञ्च जयमङ्गलायाः – " यत्र प्राधान्येनैकैकमधिकृत्य लक्षणं प्रदर्शितं तदधिकारकाण्डम्" । द्विकर्मकधातुः ,कृत्प्रत्ययः, कृत्यप्रत्ययः, स्त्रीप्रत्ययः, आत्मनेपदविधानः,कारकविभक्तिः, उपसर्गः ,कर्मप्रवचनीय णत्व-षत्वविधानस्य सूत्राणां प्रयोग दृश्यते ।

प्रसन्नकाण्डे अलंकारशास्त्रोक्तानां शव्दालंकार तथा अर्थालंकारस्य उदाहरणं प्राप्यते ।

तिङन्तकाण्डे क्रियापदस्य उदाहरणं दृश्यते । जयमङ्गलायाःउक्तञ्च – " प्रसन्नकाण्डानन्तरं तिङन्तकाण्डं शव्दलक्षणप्रयोगार्थं कथ्यते ।" चतुर्दशसर्गे प्रधानतः लिट् , पञ्चदशसर्गे लुङ् , सप्तदशसर्गे लङ् , अष्टादशसर्गे लट् , ऊनविंशसर्गे लिङ् , विंशसर्गे लोट् , एकविंशसर्गे लृङ् एवं द्वाविंशसर्गे लुट् –लकारस्य उदाहरणं दृश्यते ।

**भट्टिकाव्ये द्वितीये सर्गे लुङ्-लकारस्य प्रयोगः** -

• अपूपुजन् विष्टर-पाद्य-माल्यै-रातिथ्य-निष्णा वन-वासि-मुख्याः।

**प्रत्यग्रहीष्टां** मधुपर्क-मिश्रं तावासनादि क्षिति-पाल- पुत्रौ ।।(**२/२६**)

**प्रत्यग्रहीष्टाम्** –

अत्र प्रत्यग्रहीष्टां स्वीकृतवन्तौ इत्यर्थे प्रयुक्तः । अत्र"**लुङ्**"(अ. ३/२/११०) इति सूत्रेण प्रति उपसर्गपूर्वक ग्रह धातोः लुङ् लकारस्य प्रयोगः । क्रादिगणे (धा. पा. ९/६४)कथितः ग्रह् धातुः **।" तिप्-तस्-झि-सिप्-थस्-थ-मिब्-वस्-मस्-तातां-झ-शासाथां-ध्व-मिड्-वहि-महिङ्**"(अ. ३/४/७८) इति सूत्रेण ग्रह् +तस् विहितः ।" **च्लि लुङि**(अ. ३/१/४३) इति सूत्रेण ग्रह् +च्लि +तस् इति लभते ।"**च्ले सिच्**"(अ. ३/१/४४) इति सूत्रेण ग्रह् +सिच्+ तस् इति विहितः । अनुवन्धलोपे ग्रह्+ स्+ तस् लभते ।"**अस्ति सिचोऽपृक्ते**"(अ. ७/३/९६) इति सूत्रेण ग्रह्+ ईट्+ स् +तस् इति विहितः ।"**हलन्तम्**"(अ. १/३/३) इति सूत्रेण ग्रह्+ ई+ स् +तस् इति लभते। " **तस्- थस्-थ-मिपां-ताम्-तम्-तामः**"(अ.३/४/१०१)इति सूत्रेण ग्रह्+ ई +स् + ताम् इति विहितः ।"**आदेश-प्रत्यययोः**"(अ. ८/३/५९) इति सूत्रेण ग्रही+ ष् +ताम् इति लभते ।"**ष्टुना ष्टुः**"(अ.८/४/४१) इति सूत्रेण ग्रही+ ष् +टाम् इति विहितः । वर्णसम्मेलनेन ग्रहीष्टाम् रूपं लभते ।"**लुङ्-लङ्-लृङ्क्ष्वडुदात्तः**"(६/४/७१) इति सूत्रेण अट्+ ग्रहीष्टाम् इति विहितः ।" **हलन्तम्**" (१/३/३)इति सूत्रेण ट् लोपे अग्रहीष्टाम् रूपं निष्पन्नः ।

•दैत्याऽभिभूतस्य युवाम**वोढं** मग्नस्य दोर्भिर् भूवनस्य भारम् ।
हवींषि संप्रत्यपि रक्षतं , तै तपोधनैरित्थम**भाषिषाताम्** ।।(**२/२७**)

**अवोढम्** – अत्र अवोढम् ऊढवन्तौ इत्यर्थे प्रयुक्तः । अत्र"**लुङ्** "(अ. ३/२/११०)इति सूत्रेण वह् धातोः लुङ्-लकारस्य प्रयोगः । भ्वादिगणे (धा. पा. १/७३०) कथितः वह् धातु ।"**तिप्-तस्-झि-सिप्-थस्-थ-मिव्-वस्-मस्-तातां-झ-थासाथां-ध्व-मिड्-वहि-महिड्**"(अ. ३/४/७८) इति सूत्रेण वह्+ थस् विहितः**।" च्लि लुङि**"(अ. ३/१/४३)इति सूत्रेण वह् +च्लि + थस् इति लभते ।"**च्ले सिच्**"(अ. ३/१/४४) इति सूत्रेण वह्+ सिच्+ थस् इति विहितः । अनुवन्धलोपेवह्+स् थस् इति लभते । "**झलो झलि**"(अ.८/२/२६) इति सूत्रेण वह् + थस् इति विहितः ।"**सहि-वहोरोदवर्णस्य**"(अ. ६/३/११२) इति सूत्रेण व्+ ओत्+ ह्+ थस् इति विहितः । "**हो ढः**" (अ. ८/२/३१) इति सूत्रेण व् +ओत् +ढ् + थस् इति लभते । "**हलन्तम्**"(अ. १/३/३) इति व् +ओ +ढ्+ थस् इति विहितः ।"(अ. ३/४/१०१) इति "**तस्- थस्-थ-मिपां-ताम्-तम्-तामः**"(अ.३/४/१०१)सुत्रेण व् +ओ+ ढ्+ अम् इति लभते । "**लुङ्-लङ्-लृङक्ष्वडुदात्तः**"(अ. ६/४/७१) इति सूत्रेण अट् +वोढम् इति विहितः ।"**हलन्तम्**"(अ. १/३/३) इति सूत्रेण ट् लोपे अवोढम् रूपं निष्पन्नः।

**अभाषिषाताम्** – अत्र अभाषिषाताम् अभिहितौ इत्यर्थे प्रयुक्तः । अत्र"**लुङ्** "(अ. ३/२/११०)इति सूत्रेण भाष् धातोः लुङ्-लकारस्य प्रयोगः । भ्वादिगणे (धा. पा. १/४०७) कथितः भाष् धातु । " **तिप्-तस्-झि-सिप्-थस्-थ-मिव्-वस्-मस्-तातां-झ-थासाथां-ध्व-मिड्-वहि-महिङ्**" (अ. ३/४/७८) इति सूत्रेण भाष् + थस् विहितः । " **च्लि लुङि**"(अ. ३/१/४३)इति सूत्रेण भाष्+ च्लि + आताम् इति लभते । " **च्ले सिच्**" (अ. ३/१/४४) इति सूत्रेण भाष् + सिच् + आताम् इति विहितः । अनुवन्धलोपे भाष्+ स् +आताम् इति लभते ।"**आर्धधातुकस्येड वलादेः**"(७/२/३५) इति सूत्रेण भाष्+ इट्+ स्+ आताम् इति विहितः ।"**हलन्तम्**"(१/३/३) इति सूत्रेण भाष् +इ+ स् +आताम् इति लभते ।"**आदेश-प्रत्यययोः**"(अ. ८/३/५९) इति सूत्रेण भाषि+ ष् +आताम् इति विहितः ।"**लुङ्-लङ्-लृङक्ष्वडुदात्तः**"(अ. ६/४/७१) इति सूत्रेण अट् + भाषिषाताम् इति विहितः ।"**हलन्तम्**"(अ. १/३/३)) इति सूत्रेण ट् लोपे अभाषिषाताम् रूपं निष्पन्नः ।

•तान् **प्रत्यवादीद**थ राघवोऽपि यथेप्सितं प्रस्तुतं कर्म धर्मस्य
तपो-मरूद्भिर् भवतां शराऽग्निः संधुक्ष्यतां नोऽरि-समिन्धनेषु ।।**(२ /२८)**

**प्रत्यवादीत्** – अत्र प्रत्यवादीत् प्रत्युवाच इत्यर्थे प्रयुक्तः । अत्र"**लुङ्**"(अ. ३/२/११०)इति सूत्रेण प्रति उपसर्ग पूर्वक वद धातोः लुङ् लकारस्य प्रयोगः । भ्वादिगणे(धा. पा. १/७३५) कथितः वद् धातुः।"**तिप्-तस्-झि-सिप्-थस्-थ-मिव्-वस्-मस्-तातां-झ-थासाथां-ध्व-मिड्-वहि-महिङ्** "(अ. ३/४/७८) इति सूत्रेण वद् + तिप् विहितः । "**च्लि लुङि**"( अ. ३/१/४३)इति सूत्रेण वद् + च्लि + तिप् इति लभते ।"**च्ले सिच्**"(अ. ३/१/४४) इति सूत्रेण वद्+ सिच् + तिप् इति विहितः । अनुवन्धलोपे वद्+ स् + त् इति लभते ।"**झलो झलि**"(अ. ८/२/२६) इति सूत्रेण वद् + त् इति विहितः ।"**वद – वज – हलन्तस्याचः**"(अ. ७/२/३) इति सूत्रेण वाद् + त् इति लभते ।"**अस्ति सिचोऽपृक्ते** "(अ. ७/३/९६) इति सूत्रेण वाद् + ईट् + त् + इति विहितः ।"**हलन्तम्**"(अ. १/३/३)इति सूत्रेण वाद् + ई + त्इति लभते ।वर्णसम्मेलनेन वादीत् रूपं विहितः ।"**लुङ्-लङ्-लृङक्ष्वडुदात्तः**"(अ. ६/४/७१) इति सूत्रेण अट् + वादीत् इति विहितः । "**हलन्तम्**"(अ. १/३/३) इति सूत्रेण ट् लोपे अवादीत् रूपं निष्पन्नः ।

• लब्धा ततो विश्वजनीन वृत्तिस् तामात्मनीना**मुदवोढ** रामः ।
सद्-रत्न-मुक्ताफलं-भर्म-शोभां संवंहयन्तीं रघु-वर्ग्य–लक्ष्मीम् ।।**(२/४८)**

**उदवोढ** - अत्र उदवोढ परिणीतवान् इत्यर्थे प्रयुक्तः । अत्र" **लुङ्**"(अ. ३/२/११०) इति सूत्रेण उद् उपसर्गपूर्वक वह् धातोः । भ्वादिगणे (धा. पा.१/७३० ) कथितः वह् धातुः । " **तिप्-तस्-झि-सिप्-थस्-थ-मिव्-वस्-मस्-तातां-झ-थासाथां-ध्व-मिड्-वहि-महिङ्**"(अ. ३/४/७८) इति सूत्रेण वह् + थ इति विहितः।"**च्लि लुङि**"( अ. ३/१/४३)इति सूत्रेण वह् + च्लि + थ इति लभते ।"**च्ले सिच्**"(अ. ३/१/४४) इति सूत्रेण वद्+ सिच् + थ इति विहितः । अनुवन्धलोपेवह् +स् + थ इति लभते । "**झलो झलि** " (अ. ८/२/२६) इति सूत्रेण वह् + थस् इति विहितः ।"**सहि-वहोरोदवर्णस्य** "(अ. ६/३/११२) इति सूत्रेण व् + ओत् + ह्+थस् इति लभते । " **हो ढः**"**(अ.** ८२३१ )इति सूत्रेण व् + ओत् + ढ् + थ इति विहितः।"**हलन्तम्**"(अ.१/३/३) इति व् + ओ + ढ् + थस् इति विहितः ।"**तस्-थस्-थ-मिपा-ताम्-तम्-तामः**"(अ. ३/४/१०१) इति सूत्रेण व् + ओ + ढ् + अ इति लभते । " **लुङ्-लङ्-लृङक्ष्वडुदात्तः**"(अ. ६/४/७१) इति सूत्रेण अट् + वोढ इति विहितः ।"**हलन्तम्**"(अ.१/३/३) इति सूत्रेण ट् लोपे अवोढ रूपं निष्पन्नः ।

• उच्चैरसै राघवमाह्वतेदं धनुः स-वाणं कुरु माऽ**तियासीः** । पराक्रम –ज्ञः प्रिय-सन्ततिस् तं नम्रः क्षितीन्द्रोऽनुनिनीपुरूचे ।।**(२/५१)**

**अतियासीः** – अत्र अतियासीः मामतिक्रम्य मागमः इत्यर्थे प्रयुक्तः । अत्र"**लुङ्**"(अ. ३/२/११०) इति सूत्रेण अति उपसर्गपूर्वक या धातोः । अदादिगणे (धा.पा. २/४२) कथितः या धातुः ।"**तिप्-तस्-झि-सिप्-थस्-थ-मिव्-वस्-मस्-तातां-झ-थासाथां-ध्व-मिड्-वहि-महिङ्** "(अ. ३/४/७८) इति सूत्रेण या + सिप्इति विहितः।" **च्लि लुङि**"( अ. ३/१/४३)इति सूत्रेण या + च्लि + सिप् इति लभते ।"**च्ले सिच्**"(अ. ३/१/४४) इति सूत्रेण या + सिच् + सिप् इति विहितः । अनुवन्धलोपेया+स् स् इति लभते ।"**अस्ति सिचोऽपृक्ते**"(अ. ७/३/९६) इति सूत्रेण या + स् + ईट् + स् इति विहितः ।"**हलन्तम्**"(अ. १/३/३) इति सूत्रेण ट् लोपे या + स्+ ई + स् इति लभते ।"**लुङ्-लङ्-लृङक्ष्वडुदात्तः**"(अ. ६/४/७१) इति सूत्रेण अट् + यासीस् इति विहितः । "**हलन्तम्**"(अ. १/३/३)) इति सूत्रेण ट् लोपे अयासीस् रूपं लभते ।"**स-सजुषो-रु**"(अ. ८/२/६६) इति सूत्रेण अयासी + रु इति विहितः ।"**उपदेशेऽजनुनासिक इत्**"(अ. १/३/२)इति सूत्रेण अयासी+ र् लभते ।"**खरवसानयोर्विसर्जनीयः**"(अ. ८/३/१५) इति सूत्रेण अयासीः रूपं निष्पन्नः ।

**संङ्केताक्षरसूची** –

अ.- अष्टाध्यायी

धा. पा. - धातुपाठ

**ग्रन्थपञ्जी** –


- अष्टाध्यायी(सूत्रपाठः) –स्वामी प्रह्लादगिरिवेदान्तकेशरी, कृष्णदास अकादेमी, वाराणसी,१८८५।
- अमरकोष – नारायणराम आचार्य काव्यतीर्थः , चैखम्बा संस्कृतभवनम्, वाराणसी ।
- संस्कृत साहित्य का इतिहास –आचार्य वलदेव उपाध्याय , शारदा निकेतन , वाराणसी ।
- वैयाकरणसिद्धान्तकैमुदी– श्रीमद्भट्टोजीदीक्षितविरचिता(मूलमात्रम्), चैखम्बा सुरभारती प्रकाशनम् ,वाराणसी ।
- धातुपाठ – प्रवक्ता पाणिनिराचार्यः – प्रकाशक कपूर ट्रस्ट प्रकाशक , रेवली , सोनीपत – ३९ (हरियाणा) ।
- संस्कृत-धातुकोषः - सम्पादक युधिष्टिर मीमांसक – प्रकाशक कपूर ट्रस्ट प्रकाशक , रेवली , सोनीपत – ३९ (हरियाणा) ।


**संदर्भसूत्र सूची** –

(१) उपदेशेऽजनुनासिक इत् (१/३/२)

(२) हलन्तम् (१/३/३)

(३) च्लि लुङि (३/१/४३)

(४) च्ले सिच् (३/१/४४)

(५) लुङ् (३/२/११°)

(६) तिप्-तस्-झि-सिप्-थस्-थ-मिव्-वस्-मस्-तातां-झ-थासाथां-ध्व-मिड्-वहि-महिड् ( ३/४/७८)

(७) तस्-थस्-थ-मिपा-ताम्-तम्-तामः ( ३/४/१०१)

(८) सहि-वहोरोदवर्णस्य ( ६/३/११२)

(९) लुङ्-लङ्-लृङक्ष्वडुदात्तः ( ६/४/७१)

(१०) वद – वज – हलन्तस्याचः ( ७/२/३)

(११) आर्धधातुकस्येड वलादेः(७/२/३५)

(१२) अस्ति सिचोऽपृक्ते(७/३/९६)

(१३) झलो झलि ( ८/२/२६)

(१४) हो ढः ( ८२३१ )

(१५) खरवसानयोर्विसर्जनीयः ( ८/३/१५)

(१६) आदेश-प्रत्यययोः( ८/३/५९)

(१७) स-सजुषो-रु ( ८/२/६६)

(१८) ष्टुना ष्टुः(८/४/४१)